चौर effictum illud esse, ut urbis nomen *Kanchípura* et puellae *Vidyá* ex disticho priori eiusque scholiis male intellectis. Ceterum carmen hocce eroticum magni vel hodie aestimari Colebrookius testatur (Asiat. Res. X. p. 419.) quod ex mea quidem sententia hodiernum Indorum pulchri et venusti sensum haud prodit: totum enim carmen singulis fere constat epithetis compositis, per integrum frequenter distichon protractis, quibus nugis bullatis serior mirifice delectatur aetas, etsi non prorsus negandum est singulas interdum imagines hoc modo inter se conglutinatas suavitatis aliquid habere. Nos vero, quoniam nulla facile lingua talia exprimere potest verba sanscrita, sensum reddere studuimus et epitheton in partes suas divisimus, et modo illud, quoad eius fieri potuit, circumscribere, modo adiectivum quoddam *ornatum*, *pulchrum*, *praeditum* addere potius, quam in artificiosa versionis textura tempus terere maluimus. Haec, quae prudentes offendere vix possunt, de satacarum etiam versione mea valent: casus enim grammaticos in singulis sententiis atque totam vocabulorum structuram similibus ubique reddere haud sollicitus, mentem atque ingenium poetae percipere solum conatus sum; est enim latinae linguae indoles ita comparata, ut, id quod omnes norunt qui rem tentarunt, uberrimum Indorum usum dicendi presse sequi vix ac ne vix quidem possimus. Veteres quidem auctores latinos saepissime collaudat Schlegelius in eo quod more Graecorum vocabula efformaverint composita, sed haec, ut pace viri clarissimi dicam, in vertendis Sanscritis haud magni sunt momenti: perlegi equidem fragmenta Lucilii, Pacuvii, Enniique, perlustravi ea quae Scaliger tentavit in hymnis Orphicis latine reddendis, attamen epitheta quae ad ingenium linguae sanscritae composita forte inveniuntur, nec multa sunt, neque ultra classem quam Bahuvrihicam appellamus procedunt, quare simpliciorem ubique praetulimus versionem, ne ineptiarum merito ac molestiarum accusaremur; ceterum autem, ut par est, lacunas, quae inter textum et versionem ubique inveniuntur, commentario supplendas curavimus. Animadversiones nostras ad archaeologiam magis

spectare et eo tendere ut sensum eruant locisque similibus, vel aliunde ex aliarum gentium poesi petitis confirment, quaestionibus grammaticis intricatioribus, quae minus arriserunt, omissis, libere profiteor: quodsi igitur Paninim vapulare animadvertant perspicaciores, id quod raro accidisse mihi spero, id studio meo tribuant velim quo in mores et instituta populorum semper agitur animus. Neque tamen quaestiones quae ad crisin pertinent, omnino desiderabit lector: in Bhartriharis sententiis codices principes A et B prae ceteris secuti sumus quidem, sed varias aliorum codicum lectiones in censum quoque vocavimus; calami errores vero et farraginem exinde enatam lectionum, quas vix dicas variantes, omnino omisimus. Ex scholiis in Bhartriharim omnia delegimus quae necessaria videbantur ad locum aliquem obscuriorem illustrandum atque ad sensum enucleandum; sunt quidem simpliciora illa et saepenumero aliis tantummodo vocabulis usitatioribus rem circumscribunt, quam ob causam auctorem, cuius nomen ignoro, vetustiorem quam Mallinâthum aliosque prolixiorum commentariorum scriptores habendum puto.

His rebus absolutis unum, quod aegre tango, lectores quosdam et mihi quidem amicissimos, desiderare video, ut, quemadmodum mos invaluit, de separandis vocabulis euphonice tantum conglutinatis rationem reddam. Duo potissimum sunt, si veterem Indorum syllabas separandi rationem deserimus, orthographiae genera: aut enim, quod ad antiquam illam rationem proxime accedit, continua serie scribunt alii, aut textum ubique separant, sed ita ut Sandhis maneat intacta et vocalium craris apostraphis notetur, quae quidem posterior clarissimo mihique amicissimo Boppio debetur ratio: nos, Schlegelii, Lassenii, Rosenii aliorumque exemplum secuti, utramque rationem ita quodammodo coniunximus ut ea tantum, quae natura disiungi potuerant, separaverimus; in scholiis autem eam scribendi licentiam, qua utuntur commentatores ipsi, retinuimus, synaloephe et litterarum coniunctione sublata atque ipsis euphoniae legibus neglectis.

Haec habui fere de nova quae dicerem Bhartriharis editione. Neque vero praefationi meae finem imponere possum, quin Tibi, vir doctissime, amice suavissime *Ferdinande Benary*, pro singulari Tuo et nunquam satis laudando erga me favore, gratias agam quam maximas. Tu enim non modo in schedis perlustrandis et corrigendis tantam posuisti diligentiam, ut, quae subinde deprehendantur operarum vitia, pauca sint et plerumque levia; verum etiam dubia quaedam quae mihi remanserant et calami insuper errores omni, quae *Tua* est, sollertia atque industria solvisti et benevole mecum communicasti. Meritum de me Tuum manet alta mente repostum.

Scribebam Regimontii Prussorum mense Novembr. 1833.

*P. a Bohlen.*

अथ

# चौरपञ्चाशिका

---

अथ

## श्रीभर्तृहरिः

# ॥ चौरपञ्चाशिका ॥

॥ श्रीगणेशाय नमः ॥

विघ्नेश्वरं नमस्कृत्य रामोपाध्यायनन्दनः ।
गणपस्तनुते टीकां खण्डकाव्यस्य वैस्फुटां ॥

अथ प्राक्तनकर्मोपचीयमानपुरा परं परापादितमहानुभावो ऽतिविततभुवनतलविलासघासः प्रसरो द्विजन्मा चौराभिधानः कल्पितप्रथमयौवनाचलस्थितशोभोत्कर्षवत्या कयाचिद्राजपुत्र्या सह संसारसुखमनुभवन्न किंचिदवालोकयत् । तस्या राजपुत्र्या बहुतरदिवसोपचितमन्मथविकारमुपलभ्य दुर्जनजनैः प्रकटितमन्मथविकारे सति नृपाज्ञया दण्डनायकपुरुषैरुद्बधनाय बधमभिनीयमानश्चौरः पूर्वानुभूतसुखस्मृतिमभिनयन् अद्यापीत्यादिपञ्चाशद्भिः श्लोकैर्लोकात्मविदानाय स्वकृतिमेव प्रायो गुणभूयस्यं कृतवान् ॥

---

अद्यापि तां कनकचम्पकदामगौरीं
फुल्लारविन्दवदनां तनुरोमराजीं ।
सुप्तोत्थितां मदनविह्वलसालसाङ्गीं
विद्यां प्रमादगलितामिव चिन्तयामि ॥ १ ॥

अद्यापीति । अद्यापि उद्बन्धनाय बधभूमिं नीयमानोऽपि तां राजपुत्रीं चिन्तयामि स्मरामि ॥ तत् शब्दः पूर्वपरामर्शी । कथंभूतां । कनकचम्पकदामगौरीं सुवर्णचम्पकमालेव पीताङ्गीं । एतेन गात्रलावण्यं उक्तं वर्णोत्कर्षं च । गौरं पीते ऽरुणे श्वेते इति विश्वः । पुनः कथंभूतां । फुल्लारविन्दवदनां फुल्लं विकसितं यद् अरविन्दं तद्वद् वदनं आस्यं यस्याः सा तां । प्रहसितमुखीं इत्यर्थः । पुनः कथंभूतां । तनुरोमराजीं तन्वी सूक्ष्मा रोमराजी रोमावली यस्याः सा तां । पुनः कथंभूतां । मदनविह्वलसालसाङ्गीं मदनेन पुष्पकेतुना विह्वलं अत एव सालसं आलस्ययुक्तं अङ्गं विग्रहो यस्याः सा तां । कां इव स्मरामि । विद्यां इव वाग्देवतां इव । कथंभूतां विद्यां । प्रमादगलितां प्रमादेन च्युतां विस्मरणत्वं आगतां इत्यर्थः । विद्यानाम्नीति केचित् । तदसद् ज्येष्ठस्त्रीनामग्रहणायोग्यत्वात् । तद् उक्तं ।

शापेनाभिभूतस्य बन्ध्यस्याभव्यकर्मणा ।
गुरोः ज्येष्ठकलत्रस्य कीर्तनं पापकारणं ॥

ननु व्यभिचारे ज्ञाते तत्पत्नीत्वं एवास्याः कथं इति चेत् सत्यं गांधर्वविवाहेन पत्नीत्वस्य ज्ञातत्वात् । अत्र लोकपरंपरापाकि तावद् इति एव प्रमाणं ॥१॥

अद्यापि तां शशिमुखीं नवयौवनाढ्यां
पीनस्तनीं पुनरहं यदि गौरकान्तीं ।
पश्यामि मन्मथशरानलपीडिताङ्गीं
गात्राणि संप्रति करोमि सुशीतलानि ॥२॥

अद्यापि इदानीं अपि मरणकालेऽपि यदि पुनः तां तथाभूतां पूर्ववत् स्वागतां पश्यामि तदा संप्रति गात्राणि सुशीतलानि करोमि इति योजना । सुखजनकानि च तानि शीतलानि च सुशीतलानीति विग्रहः । कथंभूतां तां । शशिमुखीं चन्द्रवदनां अत एव शैत्ययोगात् सुशीतलानि गात्राणि करोमि इत्याशयः । पुनः कथंभूतां । नवयौवनाढ्यां नवं नूतनं यौवनं तारुण्यं तस्य आढ्यायुक्तां तां । पुनः कथंभूतां । पीनस्तनीं पीनौ स्थूलौ स्तनौ वक्षोजौ यस्याः सा तां । पु° । गौरकान्तीं मनोहरशोभायुक्तां । पुन° । मन्मथशरानलपीडिताङ्गीं कामवाण एवानलोऽग्निः तेन पीडितं दग्धं अङ्गं यस्याः सा तां ॥२॥

अद्यापि तां यदि पुनः कमलायताक्षीं
पश्यामि पीवरपयोधरभारखिन्नां ।
संपीड्य बाहुयुगलेन पिवामि वक्त्रं
उन्मत्तवन्मधुकरः कमलं यथेष्टं ॥३॥

अद्यापि इदानीमपि प्राणापगमनावसरेऽपि यदि पुनः पश्यामि अवलोकयामि तदा बाहुयुगलेन संपीड्य निर्दयं आलिंग्य तस्या वक्त्रं मुखं पिवामि । किंवत् । उन्मत्तवत् ज्ञानशून्यवत् । क इव । मधुकरः भ्रमर इष्टं वाञ्छितं कमलपत्रं इव । यथ भ्रमर इष्टं कमलं कमलान्तर्गतमधु पिवति तथाहं अपि कान्तामुखान्तर्गतं अमृतं पिवामि इति आशयः । यथा शब्दो इवेश्ले । कथंभूतां तां । कमलायताक्षीं कमलवद् आयते दीर्घे अक्षिणी यस्याः सा तां । पु° । पीवरपयोधरभारखिन्नां पीवरौ पुष्टौ यौ पयोधरौ कुचौ तयोर्भारो गौरवं तेन खिन्नां तां ॥३॥

अद्यापि तां निधुवनक्लमनिःसहाङ्गीं
आपाण्डुगण्डपतितालककुन्तलालीं ।

प्रच्छन्नपापकृतमन्तरिवावहन्तीं
कण्ठावसक्तमृदुबाहुलतां स्मरामि ॥ ४ ॥

अद्यापि तां एतादृशीं स्मरामि । कीदृशीं । निधुवनक्लमनिःसहाङ्गीं निधुवनक्लमेन सुरतश्रमेण निःसहं सालसं अङ्गं यस्याः सा तां । पुनः । आपाण्डुगण्डपतितालककुन्तलालीं ईषत् पाण्डू धूसरौ यौ गण्डौ कपोलौ तयोः पतितः अलकानां केशरचनाविशेषयुक्तानां कुन्तलानां चिकुराणां आली समूहो यस्याः सा तां । पुनः । अन्तःकरणे मत्स्मरणं आवहन्तीं धारयन्तीं । किं इव । प्रच्छन्नं गुप्तं यत् पापं तेन कृतं कर्म इव । पु° । कण्ठावसक्तमृदुबाहुलतां कण्ठे अवसक्तौ मृदू कोमले बाहुलते भुजवल्ल्यौ यया सा तां ॥ ४ ॥

अद्यापि तां सुरतजागरघूर्णमान-
तिर्यग्वलत्तरलतारकदीर्घनेत्रां ।
शृङ्गारसारकमलाकरराजहंसीं
व्रीडाविनम्रवदनामुषसि स्मरामि ॥ ५ ॥

अद्यापि इदानीं अपि उषसि प्रातःसमये व्रीडाविनम्रवदनां स्मरामि व्रीडया लज्जया विनम्रं अवनतं वदनं यस्याः सा तां । रात्रिभुक्तं अनुभूय प्रातःसमये मुखं दर्शयितुं न शक्ता भवति इत्युक्तमश्लीलत्वणं । कथंभूतां तां । सुरतजागरघूर्णमानतिर्यग्वलत्तरलतारकदीर्घनेत्रां सुरतार्थं निधुवनार्थं यज्जागरं निद्राभावः तेन घूर्णमाने आवर्त्तमाने तिर्यग्वलती वक्रीभूयमाने तरलतारके चंचलाक्षिणी कनीनिके दीर्घे विशाले नेत्रे लोचने यस्याः सा तां । पुन° । शृंगारसारकमलाकरराजहंसीं । शृंगारसारो यत्र केलिगृहं स एव कमलाकरः केलिसरोवरं तस्य राजहंसीं तां । राजहंसीं इव विहरणशीलां ॥ ५ ॥

अद्यापि तां यदि पुनः श्रवणायताक्षीं
पश्यामि दीर्घविरहज्वरिताङ्गयष्टिं ।
अङ्गैरहं समुपगुह्य ततोऽपि गाढं
नोन्मीलयामि नयने न च तां त्यजामि ॥ ६ ॥

अद्यापि अहं यदि पुनः तां पश्यामि तदा नयने न उन्मीलयामि प्रकाशयामि । किं कृत्वा । अंगैः प्रतिगात्रैः गाढं निष्ठुरं यथा स्यात् तथा एवं उपगुह्य आलिंग्य ततोऽपि तदनन्तरं अपि न च तां त्यजामि मुंचामि । कथंभूतां तां । श्रवणायताक्षीं श्रवणपर्यन्तं आयते दीर्घे अक्षिणी लोचने यस्याः सा तां । पु° । दीर्घविरहज्वरितांगयष्टिं । दीर्घविरहेण महाविश्लेषेण ज्वरिता पीडिता अंगयष्टिर् गात्रश्लेष्टं यस्याः

सा तां । यष्टिशब्द उत्तरपदे श्रेष्ठार्थः । अंगो ऽपि यः कश्चिज्ज्वरी पुरुषान्तरेण गाढं आलिंग्यते सो ऽपि विगलितज्वरो भवतीति वैद्यमनः क्वापि ॥ ६ ॥

अद्यापि तां सुरतताण्डवसूत्रधारीं
पूर्णेन्दुसुन्दरमुखीं मदविह्वलाङ्गीं ।
तन्वीं विशालजघनस्तनभारखिन्नां
व्यालोलकुन्तलकलापवतीं स्मरामि ॥ ७ ॥

अद्यापि तां स्मरामि । कथं भूतां । सुरतताण्डवसूत्रधारीं सुरतं निधुवनं तदेव ताण्डवं नृत्यं तस्य सूत्रधारीं अग्रसूचिकां तां । पुन° । मदविह्वलांगीं मदेन मत्ततया विह्वलं शिथिलं अंगं देहो यस्याः सा तां । यद्वा मदो हर्षः तेन विह्वलं अंगं यस्याः सा । पुनः । तन्वीं कृशांगीं । पु° । विशालजघनस्तनभारखिन्नां विशाला ये जघनस्तनाः श्रोणिपयोधराः तेषां भारेण गौरवेण खिन्नां तां । पु° । व्यालोलकुन्तलकलापवतीं व्यालोला ये कुन्तलाः केशाः तेषां कलापो समूहो विद्यते यस्याः सा तां । एतेन विपरीतरताभिज्ञा कथिता ॥ ७ ॥

अद्यापि तां मसृणचन्दनपङ्कमिश्र-
कस्तूरिकापरिमलोत्थविसर्पिगन्धां ।
अन्योन्यचञ्चुपुटचुम्बनखञ्जरीट-
युग्माभिरामनयनां शयने स्मरामि ॥ ८ ॥

अद्यापि मरणसमयेऽपि तां शयने महार्हशय्यायां एतादृशीं स्मरामि । कीदृशीं । मसृणचंदन°गन्धां । मसृणः चिक्कनः चन्दनपंकः मलयजकर्दमः तेन मिश्रा युक्ता या कस्तूरिका मृगनाभिः तस्याः परिमलो विमर्दोत्थसौरभः तस्माद् उत्थ उत्पन्नो विसर्पी संचारी यो गन्धः सौरभः स विद्यते यस्याः सा तां । कथं° । अन्योन्य°नयनां । अन्योन्यस्य परस्परस्य चंचुपुटेन चुंबनं यस्य तद् एतादृशं यत् खंजरीटयुग्मं खंजनयुगलं तद्वद् अभिरामे नयने यस्याः सा तां ॥ ८ ॥

अद्यापि तां निधुवने मधुपानरक्तां
लीलाधरां कृशतनुं चपलायताक्षीं ।
काश्मीरगन्धमृगनाभिकृताङ्गरागां
कर्पूरपूगपरिपूर्णमुखीं स्मरामि ॥ ९ ॥

अद्यापि तां निधुवने सुरते एतादृशीं स्मरामि । कीदृशीं । मधुपानरक्तां मधुपानेन मद्यपानेन रक्तां लोहितमुखीं । यद्वा मधुपानसक्तां मधु मद्ये पुष्परसे इत्यमरः ।

पुनः कथं भूतां । लीलां हेलां धारयतीति लीलाधरां तां । हेलालीले इत्यमरः । पुन° । कृशतनुं कृशा तनुः शरीरं यस्याः सा तां । पु° । चपलायताक्षीं चपले चंचले आयते दीर्घे अक्षिणी यस्याः सा तां । पु° । काश्मीर°रागां । काश्मीरं कुंकुमं गन्धः चंदनं मृगनाभिः कस्तूरिका तैः कृत अंगरागः शरीरलेपो यया सा तां । पु° । कर्पूरपूग°मुखीं । कर्पूरोघनः सारपूगं पूगीफलं ताभ्यां परिपूर्णं पूरितं मुखं यस्याः सा तां । पूगः क्रमुकवृन्दयोर् इत्यमरः ॥१॥

अद्यापि तत् कनकगौरकृताङ्गरागं
प्रस्वेदविन्दुविततं वदनं प्रियायाः ।
अन्ते स्मरामि रतिखेदविलोलनेत्रं
राहूपरागपरिमुक्तमिवेन्दुबिम्बं ॥१०॥

अद्यापि प्रियायाः प्राणवल्लभायाः तत् पूर्वदृष्टं वदनं एतादृशं स्मरामि । कीदृशं । कनक°रागं कनकगौरेण कुंकुमेन कृत अंगरागः तिलको यत्र तत् । कनकगौरं कुंकुमं इति विश्वकोषः । कथं भूतं वदनं । अन्ते सुरतमध्ये प्रस्वेदविन्दुविततं प्रस्वेदविन्दुभिः घर्मजलकणैः विततं व्याप्तं । पु° । रतिखेदविलोलनेत्रं । रतिखेदेन सुरतश्रमेण विलोले नेत्रे यस्य यत्र वा तत् । किं इव स्मरामि । राहू°मुक्तं इन्दुबिंबं इव । राहोर् उपराग उपग्रासः तेन परिमुक्तं पीतरसं इन्दुमण्डलं इव स्मरामि । एतेन मुखसंपूर्णं निर्मलता चोक्ता ॥१०॥

अद्यापि तन्मनसि संपरिवर्तते मे
रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या ।
जीवेति मङ्गलवचः परिहृत्य कोपात्
कर्णे कृतं कनकपत्रमनालपन्त्या ॥११॥

अद्यापि उद्बन्धनसमये ऽपि तत् मे मम मनसि चित्ते संपरिवर्तते तिष्ठति । तत् किं । क्षितिपालपुत्र्या राजकन्यया मयि क्षुतवति सति क्षिंकां (क्षिप्तां?) कुर्वति सति कोपात् पूर्वजनितकेलिक्रोधात् जीव इति मंगलवचः कल्याणवचनं परिहृत्य त्यक्त्वा यत् कनकपत्रं आभरणविशेषं कर्णे श्रुतौ कृतं रोपितं तत् संपरिवर्तते । प्रागवस्थायां समुद्भूतकेलिकलहोपजातक्रोधवशेन कसमन्द पानीयभूमौ क्षिप्तं पश्चाद् रात्रौ मयि क्षुतवति सति नेदं भद्रं इति मनसि संधाय अवैधव्य प्रेमातिशयसूचकत्वेन कर्णपाशातिथिं कृतवतीत्यर्थः । कथं भूतया । अरालकेश्या अरालाः वृजिनाः केशाः यस्याः सा तया । अरालं वृजिनं जिह्मं वक्रं इत्यमरः । अनालयन्त्या इति पाठे मौनपरयेत्यर्थः ॥११॥

अद्यापि तत् कनककुण्डलघृष्टगण्डं
आस्यं स्मरामि विपरीतरताभियोगे ।
आन्दोलनश्रमजलस्फुटसान्द्रबिन्दु-
मुक्ताफलप्रकरविच्छुरितं प्रियायाः ॥१२॥

अद्यापि मरणसमये प्रियायाः तद् आस्यं मुखं स्मरामि । कुत्र । विपरीतरताभियोगे विपरीतं यद् रतं सुरतं तस्य अभियोगः संबन्धः तस्मिन् । तद् उक्तं रतिरहस्ये । इत्थं सुरतमर्देण समुद्भूतपरिश्रमं । कृताधः कामिनं कान्ता कुर्वीत पुरुषेष्टितं ॥ कथं भूतं आस्यं । कनककुण्डलघृष्टगण्डं । कनककुण्डलाभ्यां सुवर्णकर्णपूराभ्यां घृष्टौ चिह्नितौ गण्डौ कपोलौ यस्य तत् । पु° । आन्दोलनश्रमजलस्फुटसान्द्रबिन्दुमुक्ताफलप्रकरविच्छुरितं । आन्दोलनात् पौनःपुण्यतः चालनाद् उत्थितं यत् श्रमजलं घर्मवारि तस्य स्फुटाः व्यक्ताः सान्द्राः निबिडा ये बिन्दवः अम्बुकणाः त एव मुक्ताफलप्रकराः मौक्तिकसमूहाः तैर् विच्छुरितं व्याप्तं ॥१२॥

अद्यापि तत् प्रणयभङ्गुरदृष्टिपातं
तस्याः स्मरामि रतिविभ्रमगात्रभङ्गं ।
वस्त्रान्तरस्खलनचारुपयोधरान्तं
दन्तच्छदं दशनखण्डनमण्डनं वा ॥१३॥

अद्यापि तस्या वल्लभायाः तत् स्मरामि । तत् किं । प्रणयभंगुरदृष्टिपातं प्रणये सुरतायताक्षणे सति भंगुरं वक्रीकृतं यद् दृष्टिपातं अवलोकनं तत् स्मरामि । प्रणयः प्रसवे प्रेम्णि यांचविरंभयोर् इति विश्वः । न केवलं तत् स्मरामि रतिविभ्रमगात्रभंगं च स्मरामि । रतौ सुरते यो विभ्रमः विलासः तेन गात्रभंगः शरीरचलनं तं । न केवलं तं स्मरामि वस्त्रान्तरस्खलनचारुपयोधरान्तं च स्मरामि । वस्त्रान्तरस्य उत्तरीयस्य यत् स्खलनं अन्यदेशगमनं तेन चारुः रम्यतरः यः पयोधरान्तः कुचैकदेशः । न केवलं तं स्मरामि दन्तच्छदं च स्मरामि । दन्तानां छदः अधरः तं । कथं भूतं दन्तच्छदं । दशनखण्डनमण्डनं दशनखण्डनं दन्तक्षतं तद् एव मण्डनं अलंकारो यस्य स तं ॥१३॥

अद्याप्यशोकनवपल्लवरक्तहस्तां
मुक्ताकलापपरिचुम्बितचूचुकाग्रां ।
अन्तःस्मितोच्छ्वसितपाण्डुरगण्डभित्तिं
तां वल्लभां अलसहंसगतिं स्मरामि ॥१४॥

अद्यापि तां वल्लभां प्रियां स्मरामि । कथं भूतां तां । अशोकनवपल्लवरक्तहस्तां अशोकस्य नवो नूतनो यः पल्लवः किशलयः तद्वद् रक्तौ लोहितौ हस्तौ करौ यस्याः सा तां । पु° । मुक्ताकलापपरिचुंबितचूचुकाग्रां मुक्ताकलापेन मुक्ताहारेण परिचुंबितं संसक्तं चूचुकाग्रं पयोधराग्रं यस्याः सा तां । पु° । अन्तःस्मितोच्छ्वसितपाण्डुरगण्डभित्तिं अन्तःस्मितेन अभ्यन्तरहसितेन उच्छ्वसिते पुलकिते पाण्डुरे धूसरे गण्डभित्ती कपोलप्रदेशौ यस्याः सा तां । तद् उक्तं । विकसितकपोलं तमुत्फुल्ललोचनं च यत् । किंचिद् विज्ञाः तदन्ताग्रं प्रहसितं स्मितं विदुः ॥ भित्तिः कुम्भे प्रदेशे च संविभागावकाशयोर् इति विश्वः । पु° । अलसहंसगतिं अलसो मन्दगमनो यो हंसः तस्य गतिर् इव गतिर् यस्याः सा तां । यद्वा । हंसाः प्रकृत्येव मन्दागतं ये भवंति अलसा हंसगतिर् यस्याः सा तां ॥ १४ ॥

अद्यापि तत् कनकरेणुघनोरुदेशे
तस्याः स्मरामि नखरक्षतलक्ष्म न्यस्तं ।
आकृष्टहेमरुचिराम्बरमुत्थितायाः
लज्जावशात्करधृतं च ततो व्रजन्त्याः ॥ १५ ॥

इदानीं अपि तस्याः प्रियायाः तत् स्मरामि । तत् किं । नखरक्षतलक्ष्म नखरक्षतस्य कररुहक्षतस्य लक्ष्म चिह्नं तत् । कथं भूतं तत् । न्यस्तं आरोपितं । कुत्र । कनकरेणुघनोरुदेशे चंदनयुक्तस्सुवर्णधूलिना चर्चितो यो घनोरुदेशः पयोरुभागः तत्र । शाकपार्थिवादीनं मध्यपदलोपो वक्तव्यश्चेति सूत्रेण लोपः सुवर्णशलाकामन्तर्निक्षिप्य चंदनघृष्टिः क्रियते कनकरेणुयोगो भवति ॥ काठिन्ये विग्रहतौ प्रस्थे घनोस्थे च घने इति पदसागरः ॥ पु° । आकृष्टहेमरुचिरांबरं आकृष्टं आक्षिप्तं हेमवत् सुवर्णवत् रुचिरं मनोहरं वस्त्रं यस्य यस्या वा तत् । पु° । करधृतं करेण धृतं पिहितं कथं भूतायाः तस्या अत एव लज्जावशाद् व्रीडावशात् । ततः तस्मात् स्थानात् उत्थितायाः सत्या व्रजन्त्या गच्छन्त्याः । यद्वा । न केवलं तस्याः तं नखरक्षतलक्ष्म स्मरामि किं तु उत्थितायाः तस्याः रुचिरांबरं मनोहरवस्त्रं च स्मरामि । कथं भूतं रुचिराम्बरं आकृष्टहेमं आकृष्टं आरोपितं हेमं स्वर्णं यत्र तत् । पु° । करधृतं हस्तावलंबितं । कथं भूतायाः ततः स्थानात् व्रजन्त्याः तद्धारणानन्तरं गच्छन्त्याः हस्तेन वस्त्रं अवलम्ब्य गच्छन्तीत्यर्थः ॥ १५ ॥

अद्यापि तां विधृतकज्जलचारुनेत्रां
प्रोत्फुल्लपुष्पनिकराकुलकेशपाशां ।
सिन्दूरसंलुलितमौक्तिकदन्तदन्तां
आधातहेमकटकां रहसि स्मरामि ॥ १६ ॥

अद्यापि इदानीं अपि रहसि एकान्ते एतादृशीं तां स्मरामि । कीदृशीं । विधृतकज्जलचारुनेत्रां । विशेषेण धृतं विस्तीर्णीकृतं यत् कज्जलं अंजनं तेन चारुणी मनोरमे नेत्रे लोचने यस्याः सा तां । पुनः । प्रोत्फुल्लपुष्पनिकराकुलकेशपाशां प्रोत्फुल्लानि विकसितानि यानि पुष्पाणि कुसुमानि तेषां निकरः समूहः तेन आकुलो व्याप्तः केशपाशः केशसमूहो यस्याः सा तां । पु° । सिन्दूरसंलुलितमौक्तिकहारदन्तां सिन्दूरेण संलुलितो लिप्तो यो मौक्तिकहारो मुक्तादाम तेन सदृशाः दन्ताः दशनाः यस्याः सा तां । पु° । आधातहेमकटकां आधातानि परिधातानि हेमकटकानि सुवर्णकंकणानि यस्याः सा तां ॥१६॥

अद्यापि तां गलितबन्धनकेशपाशां
स्रस्तस्रजं स्मितसुधामधुराधरौष्टीं ।
पीनोन्नतस्तनयुगोपरिचारुचुम्बि-
मुक्तावलीं रहसि लोलदृशं स्मरामि ॥१७॥

अद्यापि तां रहसि एकान्ते स्मरामि । कथं भूतां तां । गलितबन्धनकेशपाशां गलितं भूतं बंधनं बंधो यस्य एतादृशः केशपाशः शिरोरुहसमूहो यस्याः सा तां । अत एव स्रस्तस्रजं स्रस्ताः गलिताः स्रजो माला यस्याः सा तां । पु° । स्मितसुधामधुराधरौष्टीं ईषदाहसनं तदेव सुधा अमृतं तया मधुरो रुचिकरः अधरौष्टो यस्याः सा तां । पु° । पीनोन्नतस्तनयुगोपरिचारुचुम्बिमुक्तावलीं पीनौ विपुलौ उन्नतौ उच्चतरौ यौ स्तनौ कुचौ तयोर् युगं युगलं तस्योपरिचारु मनोहरं यथा स्यात् एवं चुंबिनी संलग्ना मुक्तावलिः मुक्ताहारो यस्याः सा तां । पु° । लोलदृशं लोले दृशन्नेत्रे यस्याः सा तां ॥१७॥

अद्यापि तां धवलवेश्मनि रत्नदीप-
मालामयूषपटलैर्दलितान्धकारे ।
स्वप्नोऽद्य मे रहसि संमुखदर्शनोत्थां
लज्जाभयार्तनयनामनुचिन्तयामि ॥१८॥

अद्यापि तां अनुचिंतयामि । कुत्र । धवलवेश्मनि राजसदने । कथं भूते वेश्मनि । दलितान्धकारे दलितः विशीर्णीकृतो ऽन्धकारो ध्वांतं यत्र तस्मिन् । कैः । रत्नदीपमालामयूषपटलैः । रत्नानि मणय एव दीपाः तेषां माला निकरः तस्य मयूषपटलानि किरणजालानि तैर् हेतुभूतैः । कथं भूतां तां । स्वप्नो ऽद्य मे रहसि संमुखदर्शनोत्थां अद्य मे स्वप्नः निद्रा इति कपटशब्देभ्यः रहसि एकान्ते संमुखदर्शने ऽभिमुखविलोकने उत्थां उत्थितां सा तां । पु° । अत एव लज्जाभयार्तनयनां लज्जायाः यद्भयं साध्वसं तेन आर्ते नयने लोचने यस्याः सा तां ॥१८॥

अद्यापि तां विरहवह्निविपीडिताङ्गीं
तन्वीं कुरङ्गनयनां सुरतैकपात्रं ।
नानाविचित्रकृतमण्डनमावहन्तीं
तां राजहंसगमनां सुदतीं स्मरामि ॥१९॥

अद्यापि तां स्मरामि । कथं भूतां तां । विरहवह्निविपीडितांगीं विरहो वियोगः स एव वह्निः अनलः तेन विपीडितं संतप्तं अंगं देहो यस्याः सा तां । पु° । कुरङ्ग-नयनां कुरंगस्य मृगस्य नयने यस्याः सा तां । पु° । सुरतैकपात्रं सुरतस्य निधु-वनस्य एकपात्रं श्रेष्ठाधरसुरतां तां । पात्रशब्दोऽजहल्लिंगे न पुंसके वर्तते । पु° । आवहन्तीं । किं । नानाविचित्रकृतमण्डनं नानाविचित्राणि अनेकविधरत्नानि तैः कृतं निर्मितं खचितं यन्मण्डनं आभरणं तत् । पु° । राजहंसगमनां राजहंसस्य गमनं इव गमनं यस्याः सा तां । पु° । सुदतीं शोभना दन्ता यस्याः सा तां । कुन्दकुड्मलाग्रसदृशदशनां इत्यर्थः ॥१९॥

अद्यापि तां क्षितितले वरकामिनीनां
सर्वाङ्गसुन्दरतया प्रथमैकरेखां ।
शृङ्गारनाटकरसोत्तमपानपात्रं
कान्तां स्मरामि कुसुमायुधवाणखिन्नां ॥२०॥

अद्यापि तां कान्तां स्मरामि । कथं भूतां तां । क्षितितले पृथिव्यां सर्वाङ्गसुन्दरतया सर्वगात्रमनोहरतया वरकामिनीनां श्रेष्ठनायिकानां मध्ये प्रथमैकरेखां प्रथमा चासौ एका श्रेष्ठा चासौ रेखा च तां । पु° । शृङ्गारनाटकरसोत्तमपानपात्रं शृंगारः केलिकर्म स एव नाटकं नृत्यं तत्र रसः तस्योत्तमपानपात्रं । पु° । कुसुमायुधवाणखिन्नां पंचशरवाणैः खिन्नां तां ॥२०॥

अद्यापि तां स्तिमितवस्त्रमिवाङ्गलग्नां
प्रौढप्रतापमदनानलतप्तदेहां ।
बालामनाथशरणामनुकम्पनीयां
प्राणाधिकां क्षणमहं न हि विस्मरामि ॥२१॥

अद्यापि तां क्षणं मुहूर्तमात्रं न हि विस्मरामि । कथं भूतां तां । स्तिमितवस्त्रं आर्द्र-वसनं इव अंगलग्नां अंगे शरीरे लग्ना समेतेव तां । पु° । प्रौढप्रतापमदनान-लतप्तदेहां प्रौढप्रताप उपहितपौरुषो यो मदनः कन्दर्प एवानलो वह्निः तेन तप्तः देहः शरीरं यस्याः सा तां । पु° । बालां षोडशवार्षिकीं । पु° । अनाथशरणां न

नाथः स्वामी शरणं रक्षको यस्याः सा तां । निराश्रयां इत्यर्थः । अत एव अनुकम्पनीयां अनुग्राह्यां । पु° । प्राणाधिकां प्राणेभ्यो ऽधिकां गरिष्ठां अतिप्रेयसीं इत्यर्थः ॥२१॥

अद्यापि तां प्रथमतो वरसुन्दरीणां
स्नेहैकपात्रघटितामवनीशपुत्रीं ।
हंहो ऽत्र मे स विरहः सुकुमारगात्र्याः
सोढुं न शक्यत इति प्रतिचिन्तयामि ॥२२॥

हंहो इति संबोधने अत्र अस्मिन् सुकुमारगात्र्याः शिरीषपुष्पकोमलशरीरायाः वियोगवह्निः विश्लेषानलः मया सोढुं न शक्यते न पार्यते इति हेतोः तां अवनीशपुत्रीं पृथिवीशात्मजां प्रतिचिन्तयामि । तद्विरहानलसंतापनाशार्थं इत्यर्थः । कथं भूतां तां । स्नेहैकपात्रघटितां । स्नेहस्य एकपात्ररूपा घटिता निर्मिता तां । केन । त्वया विधात्रा मध्ये वरसुन्दरीणां उत्तमनायिकानां मध्ये । कुतः । प्रथमतः सृष्टेः प्राक् ॥२२॥

अद्याप्यहं विहसितां कुचभारनम्रां
मुक्ताकलापधवलीकृतकण्ठदेशां ।
तां केलिमन्दिरगतां कुसुमायुधस्य
कान्तां स्मरामि रुचिरोज्ज्वलपुष्पकेतुं ॥२३॥

अद्यापि तां कान्तां स्मरामि । कथं भूतां तां । विहसितां विशेषेण प्रहसितमुखीं । पु° । कुचभारनम्रां कुचभारेण पयोधरगौरवेण नम्रा अवनता तां । पु° । मुक्ताकलापधवलीकृतकण्ठदेशां मुक्ताकलापेन मुक्तासमूहेन धवलीकृतः कण्ठदेशो यस्याः सा तां । पु° । केलिमन्दिरगतां केलिमन्दिरं क्रीडासदनं तत् गता प्राप्ता तां । पु° । कुसुमायुधस्य रुचिरोज्ज्वलपुष्पकेतुं रुचिरा मनोहरा उज्ज्वला अतिस्फीता पुष्पकेतुः कुसुमपताका तां ॥२३॥

अद्यापि चाटुशतदुर्ललितोचितार्थं
तस्याः स्मरामि सुरतक्लमविह्वलायाः ।
अव्यक्तनिःस्वनितकातरकथ्यमान-
संकीर्णवर्णरुचिरं वचनं प्रियायाः ॥२४॥

अद्यापि तस्याः प्रियायाः वचनं स्मरामि । कथं भूतं । चाटुशतदुर्ललितोचितार्थं । चाटुशतेन दुर्ललितः कृतसमादरः मनोहरो वा उचितो योग्यः अर्थः प्रयोजनं यस्याः

तत् । पु° । अव्यक्तानिस्वनितकातरकथ्यमानसंकीर्णवर्णरुचिरं अव्यक्तानिस्वनितेन गूढशब्दितेन कातरं मन्दं यत् कथ्यमानं तेन संकीर्णा ये वर्णा अक्षराणि तै रुचिरं मनोहरं । कथं भूतायाः तस्याः । सुरतक्लमविह्वलायाः सुरतायाः परिश्रान्तायाः ॥२४॥

अद्यापि तां सुरतजागरमीलिताक्षीं
शस्ताङ्गयष्टिगलितांशुककेशपाशां ।
शृङ्गारवारिरुहकाननराजहंसीं
जन्मान्तरे निधुवने ऽप्यनुचिन्तयामि ॥२५॥

अद्यापि निधुवने सुरते जन्मान्तरेऽपि अन्यस्मिन्नपि जन्मनि तां अनुचिन्तयामि । कथं भूतां तां । सुरतजागरमीलिताक्षीं सुरतार्थं यो जागरः तेन मीलिते मुद्रिते अक्षिणी यस्याः सा तां । पु° । शस्ताङ्गयष्टिगलितांशुककेशपाशां शस्ता प्रशस्ता अङ्गयष्टिः शरीरश्रेष्ठात् गलितौ अधःपतितौ अंशुककेशपाशौ वस्त्रशिरोरुहसमूहौ यस्याः सा तां । पु° । शृंगारवारिरुहकाननराजहंसीं शृंगार एव वारिरुहकाननं कमलवनं तस्य राजहंसी तां ॥२५॥

अद्यापि तां प्रणयिनीं मृगशावकाक्षीं
पीयूषपूर्णकुचकुम्भयुगं वहन्तीं ।
पश्याम्यहं यदि पुनर्दिवसावसाने
स्वर्गं तथात्र न च राजसुखं स्मरामि ॥२६॥

अद्यापि यदि पुनर् अहं दिवसावसाने तां पश्यामि तदा स्वर्गापवर्गं त्रिदशालयं राजसुखं च न स्मरामि । कथं भूतां तां । प्रणयिनीं प्रेमातिशययुक्तां । पु° । मृगशावकाक्षीं मृगस्य शावकः बालकः तस्य इव अक्षिणी यस्याः सा तां । पु° । पीयूषपूर्णकुचकुंभयुगं वहन्तीं पीयूषं अमृतं तेन पूर्णौ पूरितौ कुचौ तयोर् युगं युगलं तत् धारयन्तीं । अपवर्गस्त्यागमोक्षयोर् इत्यमरः ॥२६॥

अद्यापि विस्मयकरीं त्रिदशान्विहाय
बुद्धिर्बलाद्वलति मे किमहं करोमि ।
जानन्नपि प्रतिमुहूर्तमिहान्तकाले
कान्तेति वल्लभतरेति ममेति धीराः ॥२७॥

हे-धीराः सज्जनाः पण्डिताः इति अमुना प्रकारेण मे मम बुद्धिर् बलाद् इह अन्तकाले प्रतिमुहूर्तं वारं वारं तां विस्मयकरीं आश्चर्यकरीं वलति प्रकाशयति इति योजना । किं कृत्वा । त्रिदशान् देवान् विहाय त्यक्त्वा इति । केन प्रकारेण प्रकाश-

यति । मम कान्ता इति, मम वल्लभतरा इति अत्र जानन्नपि ज्ञानवान् अपि अहं किं वदामि तस्माद्धे धीराः न हि मम शक्यं इदं तदीयं विस्मरणं अवनिन्द्यं च न कर्तव्यो ऽन्यजनकृतनिन्दापरिहारः । तस्माद् भवतः एव सर्वज्ञा इति भावः ॥२७॥

अद्यापि भीरुहरिणीमिव चञ्चलाक्षीं
तां मे गतिं प्रति जनेरुदितां तु वाचं ।
श्रुत्वा स्खलद्विगलदश्रुजलाकुलाक्षीं
कान्तां स्मरामि गुरुशोकविनम्रवक्त्रां ॥२८॥

अद्यापि तां राजपुत्रीं एतदृशीं स्मरामि । कीदृशीं । मदीयं गमनं प्रति इति अमुना प्रकारेण जनैरुदितां कथितां वाचं वचनं श्रुत्वा आकर्ण्य भीरुहरिणीं इव त्रस्तकुरंगीं इव । चंचलाक्षीं इतस्ततः प्रसारितनयनां । कथं भूतां तां । स्खलद्विगलदश्रुजलाकुलाक्षीं अतिभ्रंशं आगच्छन्तीं शेषेण गलत् पतद् यद् अश्रुजलं तेन आकुले व्याप्ते अक्षिणी यस्याः सा तां । पश्चात् कर्मधारयः । पु° । गुरुशोकविनम्रवक्त्रां गुरुशोकेन अतिदुःखेन् विनम्रं अवनतं वक्त्रं मुखं यस्याः सा तां ॥२८॥

अद्यापि तां क्षणवियोगविषोपमेयां
सङ्गे पुनर्बहुतराममृताभिषिक्तां ।
मज्जीवधारणकरीं मदनात्सतन्द्रां
किं ब्रह्मकेशवहरैः सुदतीं स्मरामि ॥२९॥

अद्यापि तां स्मरामि । कथं भूतां तां । क्षणवियोगविषोपमेयां क्षणं मुहूर्तमात्रं यथा स्याद् एवं वियोगो विश्लेषः तस्माद् विषेण गरलेन उपमेया सदृशी तां । पु° । सङ्गे संबंधे सति पुनः भूयः बहुतरां अत्यर्थं अमृताभिषिक्तां अमृतेन अभिषिक्ता स्नपिता सा तां । अन्योऽपि विषार्तः सन्नमृतस्नानात् सुखी भवति इत्यर्थः ॥ अत एव मज्जीवधारणकरीं मम प्राणावनिकर्त्रीं । पु° । मदनात् सतन्द्रां तन्द्रायुक्तां । पु° । सुदतीं शोभनदशनां । सैव संसारसारित्यभिप्रयेणाह ब्रह्मकेशवहराणां स्मरणामुक्तिकरं मुक्तौ च सुखदुःखाभावः अतो न किमपि स्मरणप्रयोजनं तस्याः स्मरणेन सुखं एव अतः तां एव स्मरामि ॥२९॥

अद्यापि जातु निपुणं यतता मयापि
दृष्टं दृशा जगति जातिविधे वधूनां ।
सौन्दर्यनिर्जितरतिद्विजराजकान्तेः
कान्ताननस्य सदृशं वदनं गुणैर्न ॥३०॥

गुणैः सौन्दर्यगुणैः कान्ताननस्य कान्तामुखस्य सदृशं तत्त्यमुखं जगति संसारे जातु कदाचिद् अपि दृशा चक्षुषा अद्यापि अद्यपर्यन्तं अपि मया न दृष्टं नालोकितं । कथं भूतेन मया । निपुणं चातुर्यपूर्वकं यथा स्यात् एवं यततापि यत्नेन निरूपयतापि । कुत्र वापितु । वधूनां सुन्दरीणां जातिविधे यस्मिन् इति आदिजातिविधाने ऽपि । कथं भूतस्य कान्ताननस्य । सौन्दर्यनिर्जितरतिद्विजराजकान्तेः सौन्दर्येण सुन्दरतया निर्जिता तिरस्कृता रतिद्विजराजयोः कामपतिचंद्रयोः कान्तिः शोभा येन तत् तस्य ॥३०॥

अद्यापि राजगृहतो मयि नीयमाने
दुर्वारभीषणकरैर्यमदूतकल्पैः ।
किं किं तया बहुविधं न कृतं मदर्थे
वक्तुं न शक्यत इति व्यथते मनो मे ॥३१॥

मदर्थे मन्निमित्तं तया राजकन्यया बहुविधं कार्पण्यं किं किं न कृतं अपि तु अनेकप्रकारेण सर्वं एव कृतं तद् वक्तुं मया न शक्यते न पार्यते इति हेतो अद्यापि इदानीं अपि मे मम मनः चित्तं व्यथते दुःखितं भवति । क्व सति । राजगृहतः राजसादनात् मयि नीयमाने सति । कैः । अन्तःपुरपुरुषैः । कथं भूतैः अन्तःपुरचारिपुरुषैः । दुर्वारभीषणकरैः अतिदुःसहभयानकहस्तैः अत एव यमदूतकल्पैः कृतान्तकिंकरसदृशैः ॥३१॥

अद्यापि तन्निशि दिवा हृदयं दुनोति
पूर्णेन्दुसुन्दरमुखं मम वल्लभायाः ।
लावण्यनिर्जितरति क्षतकामदर्पं
भूयः पुरः प्रतिपदं न विलोक्यते यत् ॥३२॥

मम वल्लभायाः तत् पूर्णेन्दुसुन्दरमुखं निशि दिवा रात्रिंदिवं हृदयं दुनोति पीडयति । तत् किं । यद् वदनं भूयः पुनरपि प्रतिपदं प्रतिक्षणं पुरो यन्न विलोक्यते न दृश्यते । कथं भूतं वदनं । लावण्यनिर्जितरति लावण्येन सौन्दर्येण निर्जिता रतिः कामपतिः येन तत् । अत एव क्षतकामदर्पं क्षतः खण्डितः कामस्य दर्पो गर्वो येन तत् ॥३२॥

अद्यापि तामविहतां मनसा चलेम
संचिन्तयामि युवतीं मम जीविताशां ।
नान्योपभुक्तनवयौवनभारसारां
जन्मान्तरेऽपि मम सैव गतिर्यथा स्यात् ॥३३॥

अद्यापि मरणसमयेऽपि तां शयने महार्हशय्यानां एतादृशीं स्मरामि । अद्यापि चलेन चंचलेन मनसा कृत्वा तां तथा तेन प्रकारेण संचिन्तयामि यथा जन्मान्तरे ऽपि अन्यस्मिन्नपि जन्मनि मम सैव गतिः स्यात् । तद् उक्तं गीतायां ।

यं यं वापि स्मरं भावं त्यजत्यन्ते कलेवरं ।
तं तं एवैति कौन्तेय सदा तद्भावभावितः ॥

कथं भूतां तां । अविहतां स्त्रीगुणैर् अखण्डितां । पु॰ । युवतीं तरुणीं । पु॰ । मम जीविताशां मम जीविते जीवने आशा प्रत्याशा या सा तां । पु॰ । नान्योपभुक्तानवयौवनभारसारां न अन्येन उपभुक्तः उपभोगीकृतः नवयौवनभारस्य सारः स्थिराशो (?) यस्याः सा तां ॥३३॥

अद्यापि तद् वदनपङ्कजगन्धलुब्ध-
भ्राम्यद्द्विरेफचयचुम्बितगण्डयुग्मं ।
लीलावधूतकरपल्लवकङ्कणानां
घ्राणेऽपि मूर्च्छितमनः सुतरां मदीयं ॥३४॥

अद्यापि घ्राणादिशब्दो ऽपि मदीयं मनः सुतरां मूर्च्छितं मोहयुक्तं करोति । कथं । यथा स्याद् यद्वदनपङ्कजगन्धलुब्धभ्राम्यद्द्विरेफचयचुंबितं गण्डयुग्मं यथा स्यात् तथा तद्वदनपंकजगंधे लुब्धाः लंपटाः सन्तः भ्राम्यन्तः ये द्विरेफाः भ्रमराः तेषां चयेन समूहेन चुंबितं गण्डयुग्मं यत्र क्रियायां तत् । केषां घ्राणे । लीलावधूतकरपल्लवकंकणानां लीलया विलासेन अवधूतौ कंपितौ चालितौ यौ करपल्लवौ पल्लवसदृशकरौ तयोः कंकणानि वलयानि तेषां ॥३४॥

अद्यापि सा नखपदं स्तनमण्डले यत्
दत्तं मयास्यमधुपानविमोहितेन ।
उद्भिन्नरोमपुलकैर्बहुभिः प्रयत्नात्
जागर्ति रक्षति विलोकयति स्मरामि ॥३५॥

अद्यापि अहं इति स्मरामि । इति किं । सा तद् एव नखपदं नखक्षतं प्रयत्नाद् बलाद् रक्षति प्रयत्नाद् विलोकयति च जागर्ति च इति स्मरामि । तत् किं नखपदं । मया यत् स्तनमण्डले दत्तं न्यस्तं । कथं भूतेन मया । आस्यमधुपानविमोहितेन मुखकमलमधुपानं तेन विमोहितो भ्रान्तचित्तः तेन । कथं भूतायाः । बहुभिर् उद्भिन्नरोमपुलकैर् उद्भिन्नरोमांचलैर् लक्षिता लक्षणैः स्पृष्टायाः ॥३५॥

अद्यापि कोपविमुखीकृतगन्तुकामा
नोक्तं वचः प्रतिददाति यदैव पूर्वं ।

चुम्बामि रोदिति भृशं पतितो ऽस्मि पादे
दासस्तव प्रियतमे भज मां स्मरामि ॥३६॥

अद्यापि अहं इति स्मरामि । इति कां । कोपविमुखीकृतगन्तुकामा सती यदैव पूर्वं प्रथमं उक्तं वचो न प्रतिददाति प्रत्युत्तरं न प्रयच्छति । तदैव चुम्बामि मुखकमलं इत्यर्थः । यदा भृशं रोदिति तदा हे प्रियतमे हे प्राणवल्लभे तव दासोऽहं मां भज अङ्गाय गृहाण इत्युक्त्वा तस्यै तस्याः पादे चरणयुगे पतितो ऽस्मि इत्यहं स्मरामि कोपविमुखीकृतगन्तुकामेति कोपेन विमुखीकृता उदासिनीकृता चासौ गन्तुकामेति विग्रहः ॥३६॥

अद्यापि धावति मनः किमहं करोमि
सार्धं सखीभिरपि वासगृहे सुकान्ते ।
कान्ताप्रगीतपरिहासविचित्रनृत्ये
क्रीडाभिराम इति यातु मदीयकालः ॥३७॥

अद्यापि मम मनः इति हेतोः धावति गच्छति अत्र किं अहं करोमि इति कस्माद्धेतोः मदीयकालः सखीभिः सार्धं वासगृहे अपि अत्यर्थं यातु गच्छतु इति । कथं भूते वासगृहे । सुकान्ते शोभना कान्ता मत्प्राणेश्वरी यत्र तत् तस्मिन् । पुनः किं भूते । कान्ताप्रगीतपरिहासविचित्रनृत्ये कान्ताभिः सुन्दरीभिः प्रगीतः कृतो यः परीहासः स एव विचित्रं अद्भुतं नृत्यं नाटकं यत्र तत् तस्मिन् । पुनः कथं भूते । क्रीडभिरामे क्रीडयाभिरामं मनोहरं तत् तस्मिन् ॥३७॥

अद्याप्यहं न खलु वेद्मि किमीशपत्नी
शापागता सुरपतेरथ कृष्णलक्ष्मीः ।
धात्रैव किं त्रिजगतः परिमोहनाय
सा निर्मिता युवतिरत्नदिदृक्षया वा ॥३८॥

अद्यापि अहं खलु निश्चयेन सा का भवति इति न वेद्मि न जानामि । इति किं । ईशपत्नी पार्वती किं सुरपतेरिन्द्रस्य शापागता उर्वशी किं अथवा कृष्णलक्ष्मीः । किं धात्रैव ब्रह्मणैव त्रिजगतः त्रिलोकस्य परिमोहनाय वशीकरणाय निर्मिता किं अथवा युवतिरत्नदिदृक्षया स्त्रीश्रेष्ठं द्रष्टुं इच्छया स्पृहयेति ॥३८॥

अद्यापि तां जगति वर्णयितुं न कश्चित्
शक्तो ह्यपृष्टसदृशीं च परिग्रहं मे ।

दृष्टं द्वयोः सदृशयोः खलु येन रूपं
शक्तो भवेद्यदि स एव परं तु नान्यः ॥३९॥

अद्यापि मे मम तां परिग्रहं पत्नीं जगति संसारे वर्णयितुं गुणातिशयं ज्ञापयितुं कश्चित् कोऽपि न शक्तोऽस्ति। कथं भूतां तां। अपदृष्टसदृशीं न दृष्टा सदृशी तुल्या यस्याः सा तां। तर्हि वर्णयितुं कः शक्तः इत्याह। खलु निश्चये, येन द्वयोर् उभयोः सदृशयोः रूपं दृष्टं स एव परं केवलं यदि शक्तो भवेत् न तु अन्यः कश्चित् तस्या रूपं वर्णयितुं शक्तो भवेद् इत्यर्थः। परिग्रहशब्दोऽजहल्लिंगः पत्नीवाचकः पुंसि वर्तते ॥३९॥

अद्यापि तां नयनकज्जलमिश्रमश्रु
विश्रान्तकर्णयुगलं दधतीं विरुष्टां।
कान्तां स्मरामि घनपीनपयोधराग्र्यां
श्यामामनल्पगुणगौरवशोभमानां ॥४०॥

अद्यापि इदानीं अपि तां कान्तां स्मरामि। कथं भूतां तां। अश्रु नेत्रजलं दधतीं धरयन्तीं। कथं भूतं अश्रु। नयनकज्जलमिश्रं नयनकज्जलेन लोचनाञ्जनेन मिश्रं मिलितं। पुनः कथं भूतं। विश्रान्तकर्णयुगलं कर्णयुगले श्रवणद्वये विश्रान्तं उपगतं विश्रान्तकर्णयुगलं तत्। पुनः कथं भूतां। विरुष्टां विशेषेण रुष्टा विरुष्टा सा तां। पु॰। घनपीनपयोधराग्र्यां घनौ कठिनौ पीनौ स्थूलौ पयोधरौ कुचौ ताभ्यां आग्रायुक्ता तां। पु॰। श्यामां अप्रसूतां मधुरभाषिणीं वा। तद् उक्तं।

श्यामा च श्यामवर्णा च श्यामा मधुरभाषिणी।
अप्रसूता भवेच्छ्यामा श्यामा षोडशवर्षिकी ॥४०॥

अद्यापि निर्मलशरच्छशिगौरकान्ति
चेतो मुनेरपि हरेत् किमुतास्मदीयं।
वक्त्रं सुधारसमयं यदि तत् प्रपद्ये
चुम्बाम्यहं न विरहो व्यथते मनो मे ॥४१॥

अद्यापि इदानीं अपि अहं यदि तत् वक्त्रं वदनं प्रपद्ये प्राप्नोमि तर्हि तथा चुम्बामि अन्योन्यवक्त्रपुटयोगं करोमि। तथा कथं। यथा वियोगो विरहो मम मनो न व्यथयते पीडयति। तत् किं वक्त्रं। यद् वक्त्रं मुनेर् अपि निःस्पृहस्यापि चेतो हरेत् आकर्षति अस्मदीयं चेतो हरेत् किमुत। अत्र किं वक्तव्यं। कथं भूतं वक्त्रं। निर्मलशरच्छशिगौरकान्ति निर्मलो मलशून्यो यः शरच्छशी शरच्चन्द्रः तद्वत् कान्तिर् यस्य तत्। पु॰। सुधारसमयं अमृतरसविकारं तत् ॥४१॥

अद्यापि तत् कमलरेणुसुगन्धि वक्त्रं
तत्प्रेमवारि मकरध्वजतापहारि ।
प्राप्नोम्यहं यदि पुनः सुरतैकतीर्थं
प्राणांस्त्यजामि नितरां तदवाप्तिहेतोः ॥४२॥

अद्यापि अहं यदि पुनः तद्वक्त्रं प्राप्नोमि तदा नितरां यथा स्याद् एवं प्राणान् असून् त्यजामि मुंचामि । किं निमित्तं । तदवाप्तिहेतोः तत्प्राप्तिनिमित्तं । कथं भूतं तत् । सुरतैकतीर्थं सुतरां अतिशयेन यो रतः संतोषः तस्य एकं मुख्यं तीर्थं स्थानं पात्रं इति यवत् । पु° । तत्प्रेमवारि तस्याः प्रेम एव वारि जलं यत्र तत् । अन्यत्रापि तीर्थे जलं भवति । पु° । कमलरेणुसुगन्धि कमलरेणुवत् सुगन्धि । पु° । मकरध्वजतापहारि कन्दर्पतापशमनकारि । अन्यदपि तीर्थं कमलरेणुसुगन्धि तापहारि भवतीति ॥४२॥

अद्याप्यहो जगति सुन्दरलक्षपूर्णे
चान्योन्यपीवरगुणाधिकसंप्रपन्ने ।
अन्याभिरित्युपमितुं न मयावशक्यं
रूपं तदीयमिति मे हृदये विषादः ॥४३॥

अद्यापि मे हृदये इति विषादोऽस्ति । इतीति किं । अन्याभिर् नायिकाभिः तदीयं रूपं उपमितुं उपमानं कर्तुं मया नावशक्यं न पार्य्यं इति । क्व सति । जगति संसारे सुन्दरलक्षपूर्णे सति सुन्दराणां लक्षं असंख्यातं तेन पूर्णं व्याप्तं तस्मिन् । कथं भूते जगति । अन्योन्यपीवरगुणाधिकसंप्रपन्ने अन्योन्यस्य ये पीवरगुणाः तेषां अधिकं अतिशयः तस्मिन् संप्रपन्नं व्याप्तं तस्मिन् । चशब्दः पदपूर्णे अहो इति कष्टे ॥४३॥

अद्यापि सा हि नवयौवनसुन्दराङ्गी
रोमाञ्चवीचिविलसच्चपलाङ्गयष्टिः ।
मत्स्वान्तसारसचलद्विरहोच्चपङ्कात्
किञ्चिद्गमं प्रथयति प्रियराजहंसी ॥४४॥

अद्यापि सा प्रियराजहंसी किंचिद्गमं किंचिद् गमनं प्रथयति व्यापयति । कस्मात् । मत्स्वान्तसारसचलद्विरहोच्चपङ्कात् मम स्वान्तं अन्तःकरणं तदेव सारसं कुशेशयं तस्मिन् चलं प्रचुरीभवं चासौ विरहश्च स एव उच्चपंकः महत्कर्दमः तस्मात् । कथं भूता सा । नवयौवनसुन्दराङ्गी नवयौवनेन स्तुत्यतारुण्येन सुंदरं मनोहरं

अंगं गात्रं यस्याः सा । पु° । रोमाञ्चवीचिविलसच्चपलाङ्गयष्टिः रोमाञ्च एव वीचिः कल्लोलः तया विलसन्ती चपला चंचला अंगयष्टिः यस्याः सा ॥४४॥

अद्यापि तां नृपतिशेखरराजपुत्रीं
संपूर्णयौवनमदालसघूर्णनेत्रां ।
गन्धर्वयक्षसुरकिन्नरराजकन्यां
साक्षान्नभोनिपतितामिव चिन्तयामि ॥४५॥

अद्यापि तां नृपतिशेखरराजपुत्रीं स्मरामि नृपतिशेखराणां भूमिपालश्रेष्ठाणां राजा तस्य पुत्री तां । कथं भूतां तां । संपूर्णयौवनमदालसघूर्णनेत्रीं संपूर्णो यो यौवनमदः तेन अलसे घूर्णे नेत्रे यस्याः सा तां । पु° । साक्षात् प्रत्यक्षं नभोनिपतितां गन्धर्वयक्षसुरकिन्नरराजकन्यां इव गन्धर्वाश्च यक्षाश्च सुराश्च किन्नराश्च तेषां राजा शतमन्युः तस्य कन्या या सा तां इव ॥४५॥

अद्यापि तां प्रणयिनीं कृशवेदिमध्यां
उत्तुङ्गसंभृतसुधास्तनकुम्भयुग्मां ।
नानाविचित्रकृतमण्डनमण्डिताङ्गीं
सुप्तोत्थितां निशि दिवा न हि विस्मरामि ॥४६॥

अद्यापि इदानीं अपि तां सुप्तोत्थितां निशि दिवा रात्रिंदिवं न विस्मरामि । कथं भूतां तां । प्रणयिनीं प्रेमयुक्तां । पु° । कृशवेदिवद् मध्यो यस्याः सा तां । पु° । उत्तुङ्गसंभृतसुधास्तनकुम्भयुग्मां उत्तुङ्गौ उच्चतरौ संभृतौ अन्योन्यामिलितौ सुधापूरितौ यौ स्तनकुंभौ तयोर् युग्मं यस्याः सा तां । पु° । नानाविचित्रकृतानि अनेकरूपकृतानि यानि मण्डनानि तैर् मण्डितं अलंकृतं अंगं यस्याः सा तां ॥४६॥

अद्यापि तां कनककान्तिधृतालसाङ्गीं
व्रीडोत्सुकां मदनभीतिविकम्पमानां ।
अङ्गाङ्गसङ्गपरिचुम्बनजातमोहां
मज्जीवनौषधिमिव प्रमदां स्मरामि ॥४७॥

अद्यापि इदानीं अपि स्मरामि तां प्रमदां प्रकृष्टो मदो यस्याः सा तां । पु° । मज्जीवनौषधिमिव मम प्राणरक्षाभेषजतुल्यां इव शब्दसादृश्ये । पु° । कनककान्तिधृतालसाङ्गीं कनककान्तिः स्वर्णशोभा धृता येन एतादृशं अलसं अंगं यस्याः सा तां । पु° । व्रीडोत्सुकां व्रीडया उत्सुकां उत्कण्ठितां तां । पु° । मदनभीतिविकम्पमानां मदनात् कन्दर्पात् या भीतिः भयं तया विकंपमानां तां । पु° । अङ्गाङ्गसङ्गप-

रिचुंबनजातमोहां अंगांगसंगेन आलिंगनविशेषेण यत् चुंबनं तेन संजातो मोहो ज्ञानाभावो यस्याः सा तां ॥४७॥

अद्यापि तत् सुरतकेलिनिरस्त्रयुद्धं
बन्धोपबन्धपतनोत्थितशून्यहस्तं ।
दन्तोष्ठपीडननखक्षतरक्तसिक्तं
तस्याः स्मरामि रतिबन्धुरनिष्ठुरत्वं ॥४८॥

अद्यापि इदानीं अपि तस्याः तत् सुरतकेलिनिरस्त्रयुद्धं स्मरामि सुरतकेल्यां निधुवनक्रीडायां निरस्त्रं अस्त्रशून्यं च यद् युद्धं तत् । कथं भूतं युद्धं । बन्धोपबन्धपतनोत्थितशून्यहस्तं बन्धः पंकजासनादि उपबन्धः एतत्प्रभेदः ताभ्यां ये पतनोत्थिते पतनोत्थानेनाभ्यां शून्या हस्ता यत्र तत् । पु° । दन्तोष्ठपीडननखक्षतरक्तसिक्तां दन्तैर् यद् दष्टपीडननखैर् यानि क्षतानि तेषां रक्तं रुधिरं तेन सिक्तं । पु° । रतिबन्धुरनिष्ठुरत्वं रतिना सुरतेन बन्धुरं मनोहरं निष्ठुरत्वं यत्र तत् ॥४८॥

अद्याप्यहं वरवधूसुरतोपभोगं
जीवामि नान्यविधिना क्षणमन्तरेण ।
तच्चात्र मे मरणमेव हि दुःखशान्त्यै
विज्ञापयामि भवतस्त्वरितं लुनीहि ॥४९॥

अद्यापि इदानीं अपि अहं क्षणं मुहूर्तं वरवधूसुरतोपभोगं अन्तरेण उत्तमाङ्गनासुरतोपभोगं विना अन्यविधिना अन्यप्रकारेण न जीवामि प्राणमुक्तो न भवामि । तत् तस्मात् कारणात् हे भवतः मे मम दुःखशान्त्यै दुःखोपशमनाय जीवनमन्दे मरणं एव भवतः त्वत्तो विज्ञापयामि प्रार्थयामि । त्वं त्वरितं शीघ्रं लुनीहि छिन्धि एतावतः स्वशान्तिर्भविष्यतीत्यर्थः ॥४९॥

अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठकेन ।
अम्भोनिधिर्वहति दुःसहबाडवाग्निं
अङ्गीकृतं सुकृतिनः परिपालयन्ति ॥५०॥

॥ इति श्रीचौरमहाकविना रचिता श्लोकपञ्चाशिका समाप्ता ॥

तव ते अस्माकं किं किं फलं इत्यत आह अद्यापि नोज्झतीति सुकृतिनः पुण्यवन्तो जनाः अङ्गीकृतं स्वीकृतं यावज्जीवं परिपालयन्ति तद् दृष्टान्तं दर्शयितुं

आह । हरो महादेवः अद्यापि इयंतं कालं यावत् कालकूटं गरलं न उत्क्रांति न त्यजति । किलकिलेति पुराणादौ श्रूयते समुद्रमथनेन कालकूट उत्थितः तत्तेजसा त्रैलोक्यं दग्धुं उपक्रान्तं सोढुं कोऽपि न शशाक तज्जारणं पुरा हरेणाङ्गीकृतं तं अद्यापि वहति न च त्यजति । अपरदृष्टान्तं आह । खलु निश्चयं कूर्मः कच्छपः पृष्ठकेन कृत्वा धरणीं भूमीं अद्यापि इयन्तं दिवसं यावत् बिभर्ति धारयति । कूर्मरूपिणा विष्णुना पृष्ठेण पृथिवीं धारयिष्यामि इत्यङ्गीकृतं सोऽद्यापि तां धरणीं धारयति एव न त्यजति । अपरदृष्टान्तं आह । अम्भोनिधिः समुद्रः अद्यापि इयंतं कालं यावत् बाडवाग्निं बाडवरूपिणं अग्निं बिभर्ति धारयति कथं न तं बाडवाग्निं दुःसहं सोढुं अशक्यं । बाडवरूपो ऽग्निः समुद्रे तिष्ठतीति पौराणिका प्रसिद्धिः । सोऽद्यापि तं रक्षतीति अतो युष्माभिर् अपि यद् अंगीकृतं अस्ति तत् परिपालनीयं इति वक्तुराशयः ॥५०॥

इति श्रीसमस्तविद्यारविन्दमार्तण्डखण्डितविद्यासिसर्वविपक्षसमोपकारसंवृष्टीकृतमृद्ब्राह्मणसमूहसूरिरामोपाध्यायसूनुना गणपतिना रचिता विलासिजनचितकैरचडिकाचौरपंचाशिकायाः टीका संपूर्णा ॥संवत् १८२२॥

॥ श्रीगणेशाय नमः ॥

## ॥ अथ शृङ्गारशतकं ॥

शम्भुस्वयम्भुहरयोर्हरिणेक्षणानां
येनाक्रियन्त सततं गृहकर्मदासाः ।
वाचामगोचरचरित्रविचित्रिताय
तस्मै नमो भगवते कुसुमायुधाय ॥ १ ॥

॥ तत्रादौ स्त्रीप्रशंसा ॥

स्मितेन भावेन च लज्जया भिया
पराङ्मुखैरर्धकटाक्षवीक्षितैः ।
वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥ २ ॥

भ्रूचातुर्याकुञ्चिताक्षाः कटाक्षाः
स्निग्धा वाचो लज्जिताश्चैव हासाः ।
लीलामन्दं प्रस्थितं च स्थितं च
स्त्रीणामेतद्भूषणं चायुधं च ॥ ३ ॥

क्वचित्सुभ्रूभङ्गैः क्वचिदपि च लज्जापरिणतैः
क्वचिद्भीतित्रस्तैः क्वचिदपि च लीलाविलसितैः ।
नवोढानामेभिर्वदनकमलैर्नेत्रचलितैः
स्फुरन्नीलाब्जानां प्रकरपरिपूर्णा इव दिशः ॥ ४ ॥

वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने
वर्णः स्वर्णमपाकरिष्णुरलिनीं जिष्णुः कचानां चयः ।
वक्षोजाविभकुम्भसम्भ्रमहरौ गुर्वी नितम्बस्थली
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनं ॥ ५ ॥
स्मितं किंचिद्वक्त्रे सरलतरलो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ।
गतीनामारम्भः किसलयितलीलापरिकरः
स्पृशन्त्यास्तारुण्यं किमिह न हि रम्यं मृगदृशः ॥ ६ ॥
द्रष्टव्येषु किमुत्तमं मृगदृशां प्रेम्णा प्रसन्नं मुखं
घ्रातव्येष्वपि किं तदास्यपवनः श्रव्येषु किं तद्वचः ।
किं स्वाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तत्तनुः
ध्येयं किन्नवयौवनं सुहृदयैः सर्वत्र तद्विभ्रमः ॥ ७ ॥
एताः स्खलद्वलयसंहतिमेखलोत्थ-
झङ्कारनूपुररवाहृतराजहंसाः ।
कुर्वन्ति कस्य न मनो विवशं तरुण्यो
वित्रस्तमुग्धहरिणीसदृशैः कटाक्षैः ॥ ८ ॥
कुङ्कुमपङ्ककलङ्कितदेहा
गौरपयोधरकम्पितहारा ।
नूपुरहंसरणत्पदपद्मा
कं न वशीकुरुते भुवि रामा ॥ ९ ॥
नूनं हि ते कविवरा विपरीतबोधा
ये नित्यमाहुरबला इति कामिनीनां ।
याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयो ऽपि विजितास्त्वबलाः कथं ताः ॥ १० ॥

नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः ।
यतस्तन्नेत्रसंचारसूचितेषु प्रवर्तते ॥ ११ ॥

केशाः संयमिनः श्रुतेरपि परं पारं गते लोचने
अन्तर्वक्त्रमपि स्वभावशुचिभिः कीर्णा द्विजानां गणैः ।
मुक्तानां सतताधिवासरुचिरं वक्षोजकुम्भद्वयं
इत्थं तन्वि वपुः प्रशान्तमपि ते क्षोभं करोत्येव नः ॥ १२ ॥

मुग्धे धनुष्मती केयमपूर्वा ऽपीह दृश्यते ।
यथा बध्नसि चेतांसि गुणैरेव न शायकैः ॥ १३ ॥

सति प्रदीपे सत्यग्नौ सत्सु तारारवीन्दुषु ।
विना मे मृगशावाक्ष्या तमो भूतमिदं जगत् ॥ १४ ॥

यद्वृत्तस्तनभार एष तरले नेत्रे चले भ्रूलते
रागान्धेषु तदोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथां ।
सौभाग्याक्षरपङ्क्तिरेव लिखिता पुष्पायुधेन स्वयं
मध्यस्था ऽपि करोति तापमधिकं रोमावली केन सा ॥ १५ ॥

गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ १६ ॥

तस्याः स्तनौ यदि घनौ जघनं विहारि
वक्त्रं च चारु तव चित्त किमाकुलत्वं ।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ १७ ॥

मात्सर्यमुत्सार्य विचार्यकार्यं
आर्याः समर्यादमिदं वदन्तु ।
सेव्या नितम्बाः किमु भूधराणां
उत स्मरस्मेरविलासिनीनां ॥ १८ ॥

संसारेऽस्मिन्नसारे परिणतितरले द्वे गती पण्डितानां
तत्त्वज्ञानामृताम्भः पुलकितधियां यातु कालः कदाचित् ।
नो चेन्मुग्धाङ्गनानां स्तनजघनभराभोगसंभोगिनीनां
स्थूलोपस्थस्थलीषु स्थगितकरतलस्पर्शलोलोद्यतानां ॥ १९ ॥
मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।
पाणिभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ २० ॥
संमोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां
किं नाम वामनयना न समाचरन्ति ॥ २१ ॥

॥ इति स्त्रीप्रशंसा ॥

॥ अथ भोगादिलक्षणं ॥

विश्रम्य विश्रम्य वनद्रुमाणां
छायासु तन्वी विचचार काचित् ।
स्तनोत्तरीयेण करोद्धृतेन
निवारयन्ती शशिनो मयूखान् ॥ २२ ॥
अदर्शने दर्शनमात्रकामा
दृष्टा परिष्वङ्गरसैकलोला ।
आलिङ्गितायां पुनरायताक्ष्यां
आशास्महे विग्रहयोरभेदं ॥ २३ ॥
मालती शिरसि जृम्भणोन्मुखी
चन्दनं वपुषि कुङ्कुमान्वितं ।
वक्षसि प्रियतमा मनोहरा

स्वर्ग एष परिशिष्ट आगतः ॥ २४ ॥

प्राङ्मामिति मनागमानितगुणं जाताभिलाषं ततः
सव्रीडं तदनुश्लथोद्यतमनुप्रत्यस्तधैर्यं पुनः ।
प्रेमार्द्रस्पृहणीयनिर्भररहः क्रीडाप्रगल्भा ततो
निःशङ्काङ्गविकर्षणाधिकसुखं रम्यं कुलस्त्रीरतं ॥ २५ ॥

उरसि निपतितानां स्रस्तधम्मिल्लकानां
मुकुलितनयनानां किंचिदुन्मीलितानां ।
सुरतजनितस्वेदस्वार्द्रगण्डस्थलीनां
अधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥ २६ ॥

आमीलितनयनानां यः सुरतरसो ऽनुसंविदं कुरुते ।
मिथुनैर्मिथो ऽवधारितमवितथमिदमेव कामनिर्वहणं ॥ २७ ॥

इदमनुचितमक्रमश्च पुंसां
यदिह जरास्वपि मान्मथा विकाराः ।
तदपि च न कृतं नितम्बिनीनां
स्तनपतनावधि जीवितं रतं वा ॥ २८ ॥

एतत्कामफलं लोके यद्द्वयोरेकचित्तता ।
अन्यचित्तकृते कामे शवयोरिव संगमः ॥ २९ ॥

प्रणयमधुराः प्रेमोद्गाढा रसादलसास्तथा
मधुरभणिता मुग्धप्रायाः प्रकाशितप्रमदाः ।
प्रकृतिसुभगा विस्रम्भार्द्राः स्मरोदयदायिनो
रहसि किमपि स्वैरालापा हरन्ति मृगदृशां ॥ ३० ॥

आवासः क्रियतां गाङ्गे पापहारिणि वारिणि ।
स्तनमध्ये तरुण्या वा मनोहारिणि हारिणि ॥ ३१ ॥

प्रियपुरतो युवतीनां तावत्पदमातनोतु हृदि मानः ।
भवति न यावच्चन्दनसुरभिर्मधुनिर्मलः पवनः ॥३२॥

॥ इति भोगादिलक्षणं ॥

॥ अथ ऋतुवर्णनं ॥

॥ तत्रादौ वसन्तः ॥

परिमलभृतो वाताः शाखा नवाङ्कुरकोटयो
मधुरविरतोत्कण्ठावाचः प्रियाः पिकपक्षिणां ।
विरलसुरतस्वेदोद्गमा वधूवदनेन्दवः
प्रसरति मधौ रात्र्यां जातो न कस्य गुणोदयः ॥३३॥

मधुरयं मधुरैरपि कोकिला-
कलकलैर्मलयस्य च वायुभिः ।
विरहिणः प्रणिहन्ति शरीरिणो
विपदि हन्त सुधापि विषायते ॥३४॥

आवासः किल किंचिदेव दयितापार्श्वे विलासालसः
कर्णे कोकिलकाकलीकलरवः स्मेरो लतामण्डपः ।
गोष्ठी सत्कविभिः समं कतिपयैः सेव्याः शितांशोः कराः
केषांचित्सुखयन्ति नेत्रहृदये चैत्रे विचित्राः क्षपाः ॥३५॥

पान्थस्त्री विरहानलाहुतिकलामातन्वती मञ्जरी
मा कुन्देषु पिकाङ्गनाभिरधुना सोत्कण्ठमालोक्य ते ।
अप्येते नवपाटलापरिमलाः प्राग्भारपाटच्चरा
वान्ति क्लान्तिवितानतानवकृताः श्रीखण्डशैलानिलाः ॥३६॥

सहकारकुसुमकेसरनिकरभरामोदमूर्च्छितदिगन्ते ।
मधुरमधुविधुरमधुपे विमधौ कस्य न भवेदुत्कण्ठा ॥३७॥